९

॥पूषन्सूक्तम् उषस्सूक्तं च॥

प्रस्तावना

प्रस्तुतेऽस्मिन् पाठे सूक्तद्वयं पठिष्यते।

वेदे पूषन्सूक्तम् (म-६.५४) प्रसिद्धं सूक्तम् अस्ति। पूषा इति शब्दः पोषणार्थकपुष्-धातोः निष्पन्नः। यास्कस्य मतानुसारेण आदित्यस्य रूपं किरणैः पुष्टं भवति तस्मात् सः पूषा इति उच्यते। बृहद्देवताकारशौनकमतानुसारेण पूषा पोषणं कुर्वन् पृथिवीं पोषयति तथा किरणैः अन्धकारं निवारयति। पूषा वस्तुतः सूर्य एव। जनाः कलान्तरेण एनं भिन्नरूपं प्रदाय सूर्येतरवैशिष्ट्यम् आरोपितवन्तः। यत् सर्वं जनानाम् आवश्यकम् अस्ति। अस्य पूषन्सूक्तस्य भरद्वाजः ऋषिः, पूषन्देवता, गयत्री छन्दः। एतत् सूक्तम् आधारीकृत्य सायनाचार्यः भाष्यं रचितवान्। तत् सायनभाष्यमिति नाम्ना विख्यातम्। तस्य भाष्यस्यापि कश्चिद् अंशः प्रदत्तः अस्ति।

द्वितीयं सूक्तं तावत् उषस्सूक्तम् (ऋ.वे.३.५९)। तच्च ऋग्वेदीयम्। ऋग्वेदीये उषस्सूक्ते २०सूक्ताः सन्ति। तत्र उषादेव्याः स्तुतिः विहिता। उषादेव्याः नाम प्रायः २०० सूक्तेषु उल्लिखितम् अस्ति। उषाशब्दः प्रकाशार्थकाद् वस्-धातोः निष्पन्नः। एवम् उषाशब्दस्य अर्थः प्रकाशिका इति। उषादेव्याः वर्णनसमये वैदिकाः ऋषयः स्वकाव्यस्य प्रतिभां दर्शितवन्तः। ऋग्वेदीयस्य उषस्सूक्तस्य वामदेवः ऋषिः, त्रिष्टुप् छन्दः, उषा देवता। तृतीयमण्डले विद्यमानं सूक्तम् नवपञ्चाशम् (३.५९)।

उद्देश्यानि

इमं पाठं पठित्वा भवान् -

- पूषन्सूक्तं ज्ञातुं शक्नुयात्।
- पूषन्देवतायाः स्वरूपं ज्ञातुं शक्नुयात्।
- उषादेवीविषयकं ज्ञातुं शक्नुयात्।
- उषादेव्याः माहात्म्यं ज्ञातुं प्रभवति।
- उषादेव्याः विषये विशिष्टं ज्ञानं प्राप्तुं शक्नुयात्।
- मन्त्राणां संहितापाठं ज्ञातुं शक्नुयात्।

- सूक्तस्थानां मन्त्राणां पदपाठं ज्ञातुं शक्नुयात्।
- स्वयमेव मन्त्राणां व्याख्यानं कर्तुं शक्नुयात्।
- स्वयमेव मन्त्राणाम् अन्वयादिकं कर्तुं पारयेत्।
- मन्त्रस्थशब्दानां व्याकरणं ज्ञातुं प्रभवेत्।
- वैदिकशब्दान् ज्ञातुं शक्नुयात्।
- लौकिकवैदिकयोः शब्दयोः भेदं ज्ञातुं शक्नुयात्।

॥पूषन्सूक्तम्॥

१.१) इदानीं मूलपाठं पठाम (पूषन्सूक्तम्)

व॒यमु॑ त्वा पथस्पते॒ रथं॒ न वाज॑सातये।
धि॒ये पू॑षन्नयुज्महि॥१॥

अ॒भि नो॒ नर्यं॒ वसु॑ वी॒रं प्रय॑तदक्षिणम्।
वा॒मं गृ॒हप॑तिं नय॥२॥

अदि॑त्सन्तं चि॒दाघृ॑णे॒ पूष॒न्दाना॑य चोदय।
प॒णेश्चि॒द्वि म्र॑दा॒ मनः॑॥३॥

वि प॒थो वाज॑सातये चिनु॒हि वि मृधो॑ जहि।
साध॑न्तामुग्र नो॒ धियः॑॥४॥

परि॑ तृन्धि पणी॒नामार॑या॒ हृद॑या कवे।
अथे॑म॒स्मभ्यं॑ रन्धय॥५॥

वि पू॑ष॒न्नार॑या तुद प॒णेरि॑च्छ हृ॒दि प्रि॒यम्।
अथे॑म॒स्मभ्यं॑ रन्धय॥६॥

आ रि॑ख किकि॒रा कृ॑णु पणी॒नां हृद॑या कवे।
अथे॑म॒स्मभ्यं॑ रन्धय॥७॥

यां पूषन्ब्रह्मचोदनीमारां बिभर्ष्याघृणे।
तया समस्य हृदयमा रिख किकिरा कृणु॥८॥

या ते अष्ट्रा गोओपशाघृणे पशुसाधनी।
तस्यास्ते सुम्नमीमहे॥९॥

उत नो गोषणिं धियमश्वसां वाजसामुत।
नृवत्कृणुहि वीतये॥१०॥

९.१.१) इदानीं मूलपाठम् अवगच्छाम (पूषन्सूक्तम्)

वयमु त्वा पथस्पते रथं न वाजसातये।
धिये पूषन्नयुज्महि॥१॥

पदपाठः- वयम्। ओं (ॐ) इति। त्वा। पथः। पते। रथम्। न। वाजऽसातये। धिये। पूषन्। अयुज्महि॥१॥

अन्वयः- पथस्पते पूषन्, वयम् उ वाजसातये धिये रथं न त्वा अयुज्महि।

व्याख्या- हे पथस्पते मार्गस्य पालयितः पूषन् धिये कर्मार्थं वाजसातये अन्नस्य लाभाय च वयं न युद्धे रथमिव त्वा त्वाम् अयुज्महि युज्महि। अस्मदभिमुखं कुर्मः। उ इति पूरकः।

सरलार्थः- हे मार्गरक्षक पूषन् अस्माभिः धनप्राप्त्यर्थं तथा कर्मसम्पादनाय त्वं नियोजितः।

व्याकरणम् -

- पथस्पते-पथः मार्गस्य पते सम्बोधने एकवचने।
- सातये-सन्-धातोः क्तिनि साति चतुर्थ्येकवचने।
- अयुज्महि-युजिर् इतिधातोः लुङि उत्तपुरुषबहुवचने।
- पूषन्-पुष्-धातोः कनिन्प्रत्यये सम्बोधने एकवचने।

अभि नो नर्यं वसु वीरं प्रयतदक्षिणम्।
वामं गृहपतिं नय॥२॥

पदपाठः- अभि। नः। नर्यम्। वसु। वीरम्। प्रयतऽदक्षिणम्। वामम्। गृहऽपतिम्। नय॥२॥

अन्वयः- नर्यं वसु वीरं प्रयतदक्षिणं वामं गृहपतिं अभि नः नय।

व्याख्या- हे पूषन् नर्यं नृभ्यो हितं वसु धनम् अभि प्राप्तुं वीरं दारिद्र्यस्य विशेषेण ईरयितारं गमयितारं पूर्वमन्येभ्योऽपि दत्तधनम्। यद्वा। प्रयतं शुद्धं दक्षिणं धनं यस्य तादृशम्। वामं वननीयमेवंविधं गृहपतिं गृहस्थं नः अस्मान् नय प्रापय।

सरलार्थः- हे पूषन् मनुष्याणां कृते धनं प्रति वीरं दक्षिणाप्रदं प्रशंसनीयगृहस्थं प्रति अस्मान् नय।

व्याकरणम् -

- नर्यम्-नृशब्दात् यत्प्रत्यये, नृभ्यः हितम्।
- वामम्-वन्-धातोः मनिन्प्रत्यये।
- प्रयत- प्रपूर्वकात् यत्-धातोः क्तप्रत्यये।

अदित्सन्तं चिदाघृणे पूषन्दानाय चोदय।
पणेश्चिद्वि म्रदा मनः॥३॥

पदपाठः- अदित्सन्तम्। चित्। आघृणे। पूषन्। दानाय। चोदय। पणेः। चित्। वि। म्रद। मनः॥ ३॥

अन्वयः- आघृणे पूषन्, अदित्सन्तं दानाय चोदय, पणेः चित् मनः वि म्रद।

व्याख्या- हे आघृणे आगतदीप्ते पूषन् अदित्सन्तं चित् दातुमनिच्छन्तमपि पुरुषं दानाय अस्मद्दानार्थं चोदय प्रेरय। पणेश्चत् वणिजो ऽपि वार्धुषिकस्य लुब्धस्यापि मनः हृदयं वि म्रद दानार्थं मृदूकुरु॥

सरलार्थः- हे दीप्तियुक्त पूषन् दातुम् अनिच्छन्तं दानाय प्रेरय। वणिजः अपि मनः विशेषरूपेण कोमलं कुरु।

व्याकरणम् -

- अदित्सन्तम्- सन्नन्तदा-धातोः शतृप्रत्यये दित्सत् इति रूपे नञ्समासे द्वितीयैकवचने।
- चोदय-चुद्-धातोः यणि लोटि मध्यमपुरुषैकवचने।
- विम्रद-विपूर्वकात् म्रद्-धातोः लोटि मध्यमपुरुषैकवचने।

वि पथो वाजसातये चिनुहि वि मृधो जहि।
साधन्तामुग्र नो धियः॥४॥

पदपाठः- वि। पथः। वाजऽसातये। चिनुहि। वि। मृधः। जहि। साधन्ताम्। उग्र। नः। धियः॥

अन्वयः- उग्र, वाजसातये पथः विचिनुहि, मृधः वि जहि, नः धियः साधन्ताम्।

व्याख्या- हे उग्र उद्गूर्णबल पूषन् पथः मार्गान् वाजसातये अन्नलाभाय वि चिनुहि। शोधितान् कुरु। ये पथिभिर्गता धनं लभेमहि तादृशान् पथः पृथक्कुर्वित्यर्थः। मृधः बाधकान् तस्करादींश्च वि जहि बाधस्व। तथा नः अस्माकं धियः कर्माणि अन्नलाभार्थं क्रियमाणानि साधन्तां सिध्यन्तु। सफलानि भवन्तु।

सरलार्थः- हे पूषन् धनस्य तथा अन्नस्य प्राप्त्यर्थं मार्गं विविधप्रकारेण परिष्कुरु। तथा उत्पन्नान् बाधकान् विविधप्रकारेण नाशय। अस्माकं कर्मसिद्धिं कुरु।

व्याकरणम् -

- चिनुहि- चि-धातोः लोटि मध्यमपुरुषैकवचने।
- मृधः-मृध्-धातोः क्विपि द्वितीयाबहुवचने।
- जहि-हन्-धातोः लोटि मध्यमपुरुषैकवचने।
- साधन्ताम्-आत्मनेपदिनःसाध्-धातोः लोटि मध्यमपुरुषबहुवचने।

परि तृन्धि पणीनामारया हृदया कवे।
अथेमस्मभ्यं रन्धय॥५॥

पदपाठः- परि। तृन्धि। पणीनाम्। आरया। हृदया। कवे। अथ। ईम्। अस्मभ्यम्। रन्धय॥

अन्वयः- कवि, आरया पणीनां हृदया परि तृन्धि, अथ ईन् अस्मभ्यं रन्धय।

व्याख्या- हे कवे प्राज्ञ पूषन् पणीनां वणिजां लुब्धानां हृदया हृदयानि कठिनानि आरया। सूक्ष्मलोहाग्रो दण्डः प्रतोद इति आरा इति चाख्यायते। तथा परि तृन्धि परिविध्य। हृद्गतं काठिन्यमपनयेत्यर्थः। अथ अनन्तरम् ईम् एनान् पणीन् अस्मभ्यं रन्धय वशीकुरु॥

सरलार्थः- हे प्राज्ञ पूषन् आरया वणिजः हृदयं परितृन्धि। ततः तम् अस्माकं वशे स्थापय।

व्याकरणम् -

- तृन्धि-तृद्-धातोः लोटि मध्यपुरुषैकवचने।
- रन्धय-रध्-धातोः लोटि मध्यमपुरुषैकवचने।
- हृदया-हृदयशब्दस्य द्विदीयाबहुवचने वैदिकं रूपम्। लोके तु हृदयानि।

- आरया-ऋ-धातोः अणि टापि तृतीयैकवयने।

पाठगतप्रश्नाः- १

१. पूषन्सूक्तस्य कः ऋषिः, किं छन्दः, का च देवता।
२. उ इति किमर्थम्।
३. पथस्पते इति रूपं कथं सिद्ध्येत्।
४. सातये इति रूपं कथं सिद्ध्येत्।
५. अयुज्महि इति रूपं कथं सिद्ध्येत्।
६. पूषन् इति रूपं कथं सिद्ध्येत्।
७. नर्यम् इत्यस्य कः अर्थः।
८. प्रयतदक्षिणम् इत्यस्य विग्रहः कः।
९. नर्यम् इति रूपं कथं सिद्ध्येत्।
१०. आघृणे इत्यस्य कः अर्थः।
११. प्रयतम् इत्यस्य कः अर्थः।
१२. तृन्धि इति रूपं कथं सिद्ध्येत्।
१३. चिनुहि इति रूपं कथं सिद्ध्येत्।
१४. मृधः इत्यस्य कः अर्थः।
१५. हृदया इत्यस्य लौकिकं रूपं किम्।

९.१.२) इदानीं मूलपाठम् अवगच्छाम (पूषन्सूक्तम्)

विपू॑ष॒न्नार॑या तुद प॒णेरि॑च्छ हृ॒दि प्रि॒यम्।
अथे॑म॒स्मभ्यं॑ रन्धय॥६॥

पदपाठः- वि। पू॒ष॒न्। आर॑या। तु॒द॒। प॒णेः। इ॒च्छ॒। हृ॒दि। प्रि॒यम्॥ अथ॑। ई॒म्। अ॒स्मभ्य॑म्। र॒न्ध॒य॒॥६॥

अन्वयः- पूषन्, आरया वितुद, पणेः (हृदि)प्रियम् इच्छ, अथ ईम् अस्मभ्यं रन्धय॥

व्याख्या- हे पूषन्, आरया प्रतोदेन पणेः वणिजः हृदयं वि तुद विविध्य। तस्य पणेः हृदि हृदये प्रियम् अस्मभ्यमनुकूलं धनम् इच्छ दातव्यमितीच्छां जनय। अथ अनन्तरनम् ईम् एनान् रन्धय वशीकुरु॥

सरलार्थः- हे पूषन् स्वस्य आरायाः कृते लोभिनः वनिजः हृदयं विशेषप्रकारेण पीडय। वणिजः हृदयस्य यत् प्रियं तत् इच्छ। ततः तम् अस्माकं वशे स्थापय।

व्याकरणम् -

- तुद-तुद्-धातोः लोटि मध्यमपुरुषैकवचने।
- इच्छ-इष्-धातोः लोटि मध्यमपुरुषैकवचने।

आ रिख किकिरा कृणु पणीनां हृदया कवे।
अथेमस्मभ्यं रन्धय॥७॥

पदपाठः- आ। रिख। किकिरा। कृणु। पणीनाम्। हृदया। कवे॥ अथ। ईम्। अस्मभ्यम्। रन्धय॥७॥

अन्वयः- कवे, पणीनां हृदया आ रिख, किकिरा कृण उ, अथ ईम् अस्मभ्यं रन्धय।

व्याख्या- हे कवे प्राज्ञ पूषन् पणीनां वणिजां हृदया हृदयानि आ रिख आलिख। च किकिरा कीर्णानि प्रशिथिलानि कृणु कुरु। मृदूनि कुर्वित्यर्थः। अन्यद्गतम्।

सरलार्थः- हे प्राज्ञ पूषन् वणिजः हृदयम् अनुकूलीकुरु। किञ्च कोमलमपि कुरु। ततः तम् अस्माकं वशे स्थापय।

व्याकरणम् -

- रिख-रिख्-धातोः लोटि मध्यमपुरुषैकवचने।
- किकिरा- कृ-धातोः अचि द्वितीयाबहुवचने नपुंसके वैदिकं रूपम्। लोके तु किकिराणि।
- कृणु-कृ-धातोः लोटि मध्यमपुरुषैकवचने।(कुरु इत्यस्य वैदिकरूपम् -कृणु)।

यां पूषन्ब्रह्मचोदनीमारां बिभर्ष्याघृणे।

तया समस्य हृदयमा रिख किकिरा कृणु॥८॥

पदपाठः- याम्। पूषन्। ब्रह्मऽचोदनीम्। आराम्। बिभर्षि। आघृणे॥ तया। समस्य। हृदयम्। आ। रिख। किकिरा। कृणु॥८॥

अन्वयः- आघृणे पूषन्, ब्रह्मचोदनीयम् आरां विभर्षि तया समस्य हृदयं आरिख, किकिरा कृणु।

व्याख्या- हे आघृणे आगतहीप्ते पूषन् ब्रह्मचोदनीं ब्रह्मणोऽन्नस्य प्रेरयत्रीं याम् आरां बिभर्षि हस्ते धारयासि तथा समस्य सर्वस्य लुब्धजनस्य हृदयम् आ रिख आलिख। किकिरा किकिराणि कीर्णानि प्रशिथिलानि च कृणु कुरु।

सरलार्थः- हे दीप्तिमय पूषन् त्वम् अन्नेन प्रेरितां याम् आरां धारयसि तया आरया सर्वेषां लोकानां हृदयं कोमलीकुरु।

व्याकरणम् -

- ब्रह्मचोदनीम्-ब्रह्मोपपदात् चुद्-धातोः ल्युटि ङीपि।
- विभर्षि-विपूर्वकात् भृ-धातोः लटि मध्यमपुरुषैकवचने।

या ते अष्ट्रा गोओ॑पशाघृ॑णे पशुसाध॑नी।
तस्या॑स्ते सुम्नमी॑महे॥९॥

पदपाठः- या। ते। अष्ट्रा॑। गोऽओ॑पशा। आघृ॑णे। पशुऽसाध॑नी॥ तस्याः॑। ते। सुम्नम्। ईमहे॥ ९॥

अन्वयः- आघृणे, ते या गोओपशा पशुसाधनी अष्ट्रा ते तस्याः सुम्नम् ईमहे।

व्याख्या- हे आघृणे आगतदीप्ते पूषन् ते त्वदीया या अष्ट्रा आरा गोओपशा। उपदेशेरते इत्योपशाः। गाव ओपशा यस्यास्तादृशी। अत एव पशुसाधनी पशूनां साधयित्री भवति ते त्वदीयायाः तस्याः सम्बन्धि सुम्नं सुखम् ईमहे याचामहे।

सरलार्थः- हे दीप्तिमय पूषन् तव गोः पार्श्वे शयनकारिका आरा अस्ति। किञ्च सा पशूनां कुशलेन प्रापयिका। वयं तव आरायाः सुखम् इच्छामः।

व्याकरणम् -

- अष्ट्रा-अश्-धातोः ष्ट्रनि टापि।
- गोओपशा-गवाम् ओपशा इति तत्पुरुषः।
- पशुसाधनी- पशोः साधनी। साध्-धातोः ल्युटि ङीपि साधनीति रूपम्।
- सुम्नम्-सुपूर्वकात् म्ना-धातोः कप्रत्यये द्वितीयैकवचने।
- ईमहे-आत्मनेपदिनः ईङ्-धातोः उत्तमपुरुषबहुवचने।

उत नो॑ गोषणिं धियम॑श्वसां वा॑जसामुत।
नृवत्कृ॑णुहि वीतये॑॥१०॥

पदपाठः- उत। नः। गोऽसनिम्। धियम्। अश्वऽसाम्। वाजऽसाम्।उत।। नृऽवत्। कृणुहि। वीतये।।१०।।

अन्वयः- नः गोषणिम् उत अश्वसां उत वाजसां धियं नृवत् वीतये कृणुहि।

व्याख्या- उत अपि व हे पूषन् गोषणिं गवां सनित्रीम् अस्वसाम् अश्वानां सनित्रीं वाजसां वाजानामन्नानां सनित्रीम् उत अपि च नृवत् नृवतीं यद्वा नृणां वनीत्रीं दात्रीमेवंभूतां धियं बुद्धिं कर्म वा नः अस्माकं वीतये खादनायोपभोगार्थं कृणुहि कुरु।

सरलार्थः- हे पूषन् अस्माकं गवां प्रापिकां, अश्वानां प्रापिकां, अन्नानां प्रापिकां च अभिलाषां राजतुल्यानन्दाय पूर्णं कुरु।

व्याकरणम् -

- गोषणिम्-गोपूर्वकषणु-धातोः इप्रत्यते।
- अश्वसाम्, वाजसाम्-षष्ठीबहुवचने वैदिकं रूपम्।लोके तु अश्वानाम्, वाजानाम्।
- नृवत्-नृशब्दात् मतुप्प्रत्यये।
- वीतये-वी-धातोः क्तिन्प्रत्यये वीति, तस्य चतुर्थ्यैकवचने।
- कृणुहि-कृ-धातोः लोटि मध्यमपुरुषैकवचने वैदिकं रूपम्। लोके तु कुरु इति।

पाठगतप्रश्नाः-२

१६. आरा इत्यस्य कः अर्थः।
१७. पणिः इत्यस्य कः अर्थः।
१८. वि तुद इत्यस्य कः अर्थः।
१९. किकिरा इत्यस्य कः अर्थः।
२०. किकिरा इत्यस्य लौकिकं रूपं किम्।
२१. किकिरा इति रूपं कथं सिद्ध्येत्।
२२. कृणु इति रूपस्य लौकिकं रूपं किम्।
२३. ब्रह्मचोदनीम् इति रूपं कथं सिद्ध्येत्।
२४. अष्ट्रा इति रूपं कथं सिद्ध्येत्।
२५. गोओपशा इति रूपं कथं सिद्ध्येत्।
२६. सुम्नम् इति रूपं कथं सिद्ध्येत्।
२७. ईमहे इति रूपं कथं सिद्ध्येत्।
२८. सुम्नम् इत्यस्य कः अर्थः।

२९. वीतये इत्यस्य कः अर्थः।

३०. कृणुहि इति रूपस्य लौकिकं रूपं किम्।

१.२) पूषदेवस्य स्वरूपम्

ऋग्वेदे वर्णिताः सर्वे अपि देवाः प्राकृतिकशक्तिभावनया कल्पिताः। परन्तु पूषदेवस्य विषये तथा किमपि न श्रूयते येन सः प्राकृतिकशक्तेः कल्पितः इति वक्तुं शक्यते। पूषा-इत्ययं शब्दः पुष्-धातोः निष्पन्नः, पुष्धातोः अर्थः पोषणम् इति। अतः यः पुष्टिदाता पोषकः च स एव पूषा-शब्देन उच्यते। अस्माकं जगति अन्तरिक्षस्थानीयः सूर्यदेव एव सर्वोत्तमः पोषकः। सः यथा प्राणिनां जीवनशक्तेः पोषकः, तथैव पार्थिवसम्पदः वृद्धये सहायकः पार्थिवसम्पत्परिपोषको वा। सूर्यस्य तथाविधं स्वरूपम् एव पूषरूपेण वैदिकैः ऋषिभिः कल्पितम्। अतः पूषा द्युस्थानीयः देवः।

प्राचीनाः आचार्याः अपि पूषदेवस्य पुष्टिप्रदायकरूपविषये ज्ञानवन्तः आसन्। निरुक्तकारः यास्कमहर्षिः तस्य निरुक्तग्रन्थे पूषाशब्दस्य व्युत्पत्तिप्रदर्शनावसरे पूषदेवस्य पुष्टिप्रदायकं रूपम् एव वर्णयति। तथा च उक्तं यास्केन- 'यद्रश्मिपोषं पुष्यति तत् पूषा भवति'।(१२.७) इति। अपरत्र सः पूषदेवम् आदित्यरूपेण एव वर्णयति। तथाहि उक्तं तेन- 'सर्वेषां भूतानां गोपायितादित्यः' (७.९) इति। अपरस्मिन् वैदिकग्रन्थे शौनकेन उक्तं-

'पूष्यन् क्षितिं पोषयति प्रणुदन् रश्मिभिस्तमः।

तेनैनमस्तौत् पूषेति भरद्वाजस्तु पञ्चभिः।।'(२.६३)। इति।

परस्मिन् काले वेदव्याख्याकर्ता सायणः पूषदेवम् उद्दिश्य उवाच- 'जगत्पोषकः पृथिव्यभिमानिदेवः'। इति। ऋग्वेदेषु साकल्येन अष्टसु सूक्तेषु पूषदेवस्य स्तुतिः कृता। सः आघृणिः अर्थाद् जाज्वल्यमानः। सः कपर्दी अर्थात् जटाजालयुक्तः श्मश्रुविशिष्टः। हेमवर्णीयः तीक्ष्णशरः बाणश्च तस्य प्रधानम् आयुधम्। तस्य वाहनम् अजः। तथाहि उक्तं- 'अजाः पूष्णश्च वाजिन'(बृहद्देवता८.१४१)। इति। घृतमिश्रितः यवस्य सक्तुः तस्य प्रधानं खाद्यम्। ब्राह्मणसाहित्ये उच्यते दन्तहीनत्वात् सः चूर्णं खाद्यद्रव्यं भक्षति स्म इति। तथाहि शुक्लयजुर्वेदस्य शतपथब्राह्मणे सः अदन्तकः आसीद् इति उच्यते। तद्विषयकम् एकम् उपाख्यानम् अपि प्राप्यते।

ऋग्वेदीयसमाजः कृषिप्रधानः आसीत्। कृषिक्षेत्रे च पशूनाम् उपयोगः अधिकः आसीत्। तस्मात् पशुपालनम् अपि जीविकारूपेण ते गृहीतवन्तः। पूषा ऋग्वेदे पशुपालकानाम् अभीष्टः देवः इति उच्यते। गोसम्पद् एव श्रेष्ठा सम्पद् आसीदिति श्रूयते। अतः तासां रक्षणाय जागरूकाः आसन् सर्वे। अतः ते पूषदेवं मन्त्रेषु प्रार्थयन्ति यत् हे पूषन् अस्माकं गोधनं सर्वदा सुरक्षितं भवेत्, व्याघ्रादीनां पशूनां त्रासात् मुक्तं भवेत्, कूपपाताद् रक्षितं भवेदिति। नूतनतृणक्षेत्रस्य अन्वेषणाय ते देशान्तरं गच्छन्ति स्म। तदा गमनसमये ते अस्यैव देवस्य स्तुतिं कुर्वन्ति स्म यतो हि पूषदेवः तेषां पथप्रदर्शकः रक्षकश्च। सः पशुपालकान् विघ्नरहितेषु मार्गेषु प्रवर्तयति, हिंस्रजन्तूनां दुष्टमानवानां च हस्ताद् रक्षयति। सः देवः तृणयुक्तेषु क्षेत्रेषु

तान् प्रवर्तयन्ति। यदा च पशवः ह्रियन्ते तदा स एव तेषां पशूनां प्रापकः। ऋग्वेदे विशिष्टपथप्रदर्शकरूपेणैव तस्य देवस्य आगमनम्। तदर्थं मृतपुरुषाणां परलोकगमनसमये पथप्रदर्शकरूपेण स एव हि आगच्छति इति ऋग्वेदमन्त्रेषु श्रूयते।

एवम् अनेकेषु कर्मसु तस्य देवस्य प्राधान्यं परिपश्यन्तः ऋषयः वेदमन्त्रैः तस्य स्तुतिं विहितवन्त इति शम्।

१.३) पूषन्सूक्तस्य सारः

ऋग्वेदसंहितायाः षष्ठमण्डलस्य चतुःपञ्चाशं सूक्तं हि पूषन्सूक्तम्। अस्य सूक्तस्य ऋषिः भारद्वाजः, छन्दः चत्वारिंशदक्षरोपेता गायत्री, देवता च पूषा। अत्र दश मन्त्राः सन्ति। यः पुरुषः नष्टधनम् अधिगन्तुम् इच्छति सः अस्य सूक्तस्य जपं कुर्याद् इति आश्वलायनगृह्यसूक्ते अस्य सूक्तस्य विनियोगः उपलभ्यते। तथाहि आम्नातम् आश्वलायनगृह्यसूत्रे- 'संपूषन् विदुषा इति नष्टमधिजिगमिषन् मूलहो वा'। इति।

हे मार्गरक्षक पूषन् वयं धनप्राप्त्यर्थं तथा कर्मसम्पादनार्थं तव नियोगं कृतवन्तः। त्वम् अस्माकं पुष्टिं विधेहि। त्वं तस्य पुरुषस्य सन्धानम् अस्मभ्यं ददातु यः सरलेन उपायेन नष्टद्रव्यप्राप्त्युपायविषये उपदिशति, यश्च अस्माकं नष्टं धनम् कुत्र अस्ति इति दर्शयिष्यति। हे पुषन् देव अस्मभ्यम् अनुग्रहं कुर्वन्तु यथा वयं तस्य जनस्य सङ्गं प्राप्नुयाम यः जनः जानाति अस्माकं नष्टाः गावः पशवश्च कुत्र अवस्थानं कुर्वन्ति इति। स एव अस्मभ्यं तेषां गृहानां विषये बोधयति यत्र अस्माकं हृताः गावः सन्ति।

पूषन्-देवस्य आयुधं हि चक्रम्। तत् चक्रम् अविनाशि अस्ति अर्थात् तस्य चक्रस्य विनाशं कर्तुं नैव शक्यते। अस्य चक्रस्य कोशः अपि न हीयते। अस्य चक्रस्य या धारा सा व्यथां न प्राप्नोति अर्थात् न कुण्ठीभवति। तेनैव चक्रेण तान् चौरान् विनाशयतु ये अस्मदीयं धनं लुण्ठितवन्तः। तथाहि आम्नातं पूषन्सूक्ते-

'पूष्णश्चक्रं न रिष्यति न कोशोऽव पद्यते।

नो अस्य व्यथते पविः'।।३। इति।

यः पूषदेवाय हविः ददाति अर्थात् हविर्द्रव्यैः यः अस्य पूजां करोति तं यजमानं पूषा कदापि न विस्मरति। अपि च पूषदेवः तस्मै सर्वप्रथमं सर्वविधं धनं प्रददाति। तथाहि आम्नातं पूषन्सूक्ते-

'यो अस्मै हविषाविधन्न तं पूषापि मृष्यते।

प्रथमो विन्दते वसु'।।इति।४।

हे पूषन्, अस्माकं पशूनां रक्षणाय सर्वदा तेषां पृष्ठतः गच्छतु। अस्माकम् अश्वान् चौरस्य हस्तात् अवतु, अस्मभ्यं च धनं प्रददातु। तथाहि आम्नातं- 'पूषा गा अन्वेतु नः पूषा रक्षत्वर्वतः। पूषा वाजं सनोतु नः'।।इति। यः सोमरसस्य पेषणं करोति तस्य यजमानस्य गवां पृष्ठतः गच्छतु तासां रक्षां च करोतु। अपि च मत्सदृशाः ये तव स्तोतारः तेषां याः गावः तासां गवां पृष्ठतः गच्छतु। तासां रक्षां च विदधातु। तथाहि आम्नातं पूषन्सूक्ते-

'पूषन्नु प्र गा इहि यजमानस्य सुन्वतः।

अस्माकं स्तुवतामुप'।।इति।

अस्माकं याः गावः सन्ति तासां कापि क्षतिः नाशो वा मा भवतु, कस्या अपि गोः पीडा न भवतु। कापि गौः कूपे पतिता सती मृता मा भवतु। अतः त्वम् अस्माकं विद्वेषरहिताभिः गोभिः सह सायंकाले आगच्छ। तथाहि आम्नातं पूषन्सूक्ते-

माकिर्नेशन्माकीं रिषन्माकीं सं शारि केवटे।

अथारिष्टाभिरा गहि।। इति।

यः पूषा अस्माकं प्रार्थनां शृणोति, दरिद्रतां च दूरीकरोति, यद्धनं कदापि नष्टं न भवति तादृशः यः पूषदेवः, अपि च यः सर्वेषाम् ईशः अर्थात् शासनकर्ता तथाभूतस्य पूषदेवस्य वयं प्रार्थनां कुर्मः। तथाहि आम्नातं पूषन्सूक्ते-

'शृण्वन्तं पूषणं वयमिर्यमनष्टवेदसम्।

ईशानं राय ईमहे'।।इति।

हे पोषक देव तव कार्ये निरताः वयं कदापि दुःखं कष्टं वा न प्राप्नुमः। वयं सर्वदा तव स्तोतारः स्मः। तव दक्षिणं हस्तं मां परितः प्रसारयतु, मम यद्गोधनं नष्टम् अस्ति तद् मह्यं प्रत्यर्पय अर्थात् नष्टं गोधनं पुनः आगच्छतु इति यजमानस्य अन्तिमा प्रार्थना। तथाहि आम्नातं-

'परि पूषा परस्ताद्धस्तं दधातु दक्षिणम्।

पुनर्नो नष्टमाजतु'।।इति।

एवं पूषन्सूक्तस्थाः ये दश ऋक्मन्त्राः तेषां सारः अतिसंक्षेपेण प्रस्तुत इति शम्।

पाठसारः - १

अस्मिन् पाठे सूक्तद्वयं विद्यते। तयोः प्रथमं तावत् पूषन्सूक्तम्। अस्मिन् पूषन्सूक्ते दश मन्त्राः सन्ति। दशमन्त्रैः सर्वत्र प्रार्थना एव विहिता। तत्र आदिमे मन्त्रे धनप्राप्त्यर्थं कर्मसम्पादनाय उक्तम्। द्वितीये मन्त्रे धनवन्तं बलवन्तं प्रशंसनीयं गृहस्थं प्रति नयनाय उक्तम्। तृतीये मन्त्रे दातुम् इच्छन्तं जनं दानाय प्रेरय इति प्रार्थितम्। चतुर्थे मन्त्रे धनप्राप्त्यर्थं मार्गे विद्यमानं शत्रुं नाशय इति प्रार्थितम्। पञ्चमे मन्त्रे वणिजः हृदयस्य चतुर्षु दिक्षु कर्तनाय प्रार्थितम्। षष्ठे मन्त्रे पूर्वमन्त्रवत् तथैव उक्तम्। सप्तमे मन्त्रे वणिजः हृदयस्य कोमलीकरणाय प्रार्थितम्। अष्टमे मन्त्रे आरया सर्वेषां जनानां हृदयस्य कोमलीकरणाय प्रार्थितम्। नवमे मन्त्रे आरायाः सुखप्राप्त्यर्थं प्रार्थितम्। दशमे मन्त्रे गवां प्रापिकायाः, अश्वानां प्रापिकायाः, अन्नानां प्रापिकायाः च अभिलाषायाः राजतुल्यानन्दाय पूर्णकरणाय प्रार्थितम्। एवं सम्पूर्णे पूषन्सूक्ते प्रायः वणिजः हृदयस्य कोमलीकरणाय तथा धनप्राप्त्यर्थं बहुधा प्रार्थितम्।

उषस्सूक्तम्

१.४) अधुना उषस्सूक्तस्य (ऋ.वे.३.५९) मूलपाठ उपन्यस्यते।

उषो॒ वाजे॑न वाजिनि॒ प्रचे॑ताः॒
स्तोमं॑ जुषस्व गृण॒तो म॑घोनि।
पु॒रा॒णी दे॑वि यु॒व॒तिः पु॑रन्धि॒-
रनु॑ व्र॒तं च॑रसि विश्ववारे॥१॥

उषो॑ दे॒वम॑र्त्या॒ वि भा॑हि
च॒न्द्रर॑था सू॒नृता॑ ई॒रय॑न्ती।
आ त्वा॑ वहन्तु सु॒यमा॑सो॒ अश्वा॒
हिर॑ण्यवर्णां पृथु॒पाज॑सो ये॥२॥

उषः॑ प्रती॒ची भुव॑नानि॒ विश्वो॒-
र्ध्वा ति॑ष्ठस्य॒मृत॑स्य के॒तुः।
स॒मा॒नमर्थं॑ चरणी॒यमा॑ना
च॒क्रमि॑व नव्य॒स्या व॑वृत्स्व॥३॥

अव॒ स्यूमे॑व चिन्व॒ती म॒घो-
न्यु॒षा या॑ति स्वस॑रस्य॒ पत्नी॑।
स्व॒१र्जन॑न्ती सु॒भगा॑ सु॒दंसा॒
आन्ता॑द्दि॒वः प॑प्रथ॒ आ पृ॑थि॒व्याः॥४॥

अच्छा॑ वो दे॒वीमु॒षसं॑ विभा॒तीं
प्र वो॑ भरध्वं॒ नम॑सा सुवृ॒क्तिम्।
ऊ॒र्ध्वं म॑धु॒धा दि॒वि पाजो॑ अश्रे॒-
त्प्र रो॑च॒ना रु॑रुचे र॒ण्वसं॑दृक्॥५॥

ऋतावरी दिवो अर्कैरबोध्या
रेवती रोदसी चित्रमस्थात्।
आयतीमग्न उषसं विभातीं
वाममेषि द्रविणं भिक्षमाणः॥६॥

ऋतस्य बुध्न उषसामिषण्यन्-
वृषा मही रोदसी आ विवेश।
मही मित्रस्य वरुणस्य माया
चन्द्रेव भानुं वि-दधे पुरुत्रा॥७॥

९.४.१) इदानीं मूलपाठम् अवगच्छाम (उषस्सूक्तम्)

उषो वाजेन वाजिनि प्रचेताः
स्तोमं जुषस्व गृणतो मघोनि।
पुराणी देवि युवतिः पुरन्धि-
रनुव्रतं चरसि विश्ववारे॥१॥

पदपाठः- उषः। वाजेन। वाजिनि। प्रऽचेताः। स्तोमम्। जुषस्व। गृणतः॥ मघोनि। पुराणी।
देवि। युवतिः। पुरम्ऽधिः। अनु। व्रतम्। चरसि। विश्ववारे॥

अन्वयः- वाजेन वाजिनि मघोनि उषः प्रचेताः गृणतः स्तोमं जुषस्व। विश्ववारे देवि पुराणी युवतिः पुरंधिः व्रतम् अनुचरसि।

व्याख्या- वाजेन वाजिनि अन्नेनान्नवति। मघोनि धनवति। हे उषः प्रचेताः प्रकृष्टज्ञानवती सती त्वं गृणतः त्वं स्तोत्रं कुर्वतः स्तोतुः स्तोमं स्तोत्रं जुषस्व सेवस्व। यद्वा वाजेन हविर्लक्षणेनान्नेन सह स्तोमं जुषस्व इति सम्बन्धः। विश्ववारे विश्वैः सर्वैः वरणीये हे उषः देवि पुराणी पुरातनी। युवतिः इत्युपमा। तद्वत् शोभमाना। पुरंधिः पुरु बहुधीः स्तोत्रलक्षणं कर्म यस्याः सा बहुस्तोत्रवती। पुरंधिर्बहुधीः इति यास्कः, पुरन्धिः शोभमाना वा। एवंविधगुणोपेता त्वम् अनुव्रतं यज्ञकर्माभिलक्ष्य चरसि यष्टव्यतया वर्तसे॥

सरलार्थः- अन्नद्वारा अन्नवति धनवति हे उषे! प्रकृष्टज्ञानसम्पन्ना भवती स्तूयमानस्य जनस्य प्रार्थनां स्वीकरोतु। हे सर्वैः इष्यमाणे देवि उषे! पुरातनी युवतिः इव नानाप्रकारैः स्तूयमाना भवती इमं यज्ञं लक्षीकृत्य विचरणं करोतु।

व्याकरणविमर्शः-

- प्रचेताः- प्रपूर्वकात् चित्-धातोः तृच्प्रत्यये प्रथमाबहुवचने प्रचेताः इति रूपम्।
- गृणतः- गृ-धातोः श्नाप्रत्यये शतृप्रत्यये च षष्ठ्येकवचने गृणतः इति रूपम्।
- जुषस्व- जुष्-धातोः लोट्लकारे मध्यमपुरुषैकवचने जुषस्व इति रूपम्।
- चरसि- चर्-धातोः लट्लकारे मध्यमपुरुषैकवचने चरसि इति रूपम्।

उषो देवमर्त्या वि भाहि
चन्द्ररथा सूनृता ईरयन्ती।
आ त्वा वहन्तु सुयमासो अश्वा
हिरण्यवर्णां पृथुपाजसो ये॥२॥

पदपाठः- उषः। देवि। अमर्त्या। वि। भाहि। चन्द्रऽरथा। सूनृता। ईरयन्ती॥ आ। त्वा। वहन्तु। सुऽयमासः। अश्वाः। हिरण्यवर्णाम्। पृथुऽपाजसः। ये॥

अन्वयः- उषः देवि अमर्त्या चन्द्ररथा सूनृता ईरयन्ती वि भाहि। पृथुपाजसः सुयमासः ये अश्वाः हिरणवर्णां त्वा आ वहन्तु।

व्याख्या- हे उषो देवि अमर्त्या मरणधर्मरहिता चन्द्ररथा सुवर्णमयरथोपेता सूनृता प्रियसत्यरूपा वाचः ईरयन्ती उच्चारयन्ती। तादृशी त्वं वि भाहि सूर्यकिरणसम्बन्धात् विशेषेण दीप्यस्व, पृथुपाजसः प्रभूतबलयुक्ता अरुणवर्णा ये अश्वा विद्यन्ते सुयमासः सुष्ठु नियन्तुं शक्या रथो योजितास्तेऽश्वाः हिरण्यवर्णां त्वा त्वाम् आ वहन्तु।

सरलार्थः- हे देवि उषे! मरणधर्मरहिता सुवर्णमयरथयुक्ता सत्यं प्रियां वाणीं च उच्चारयन्ती भवती विशेषरूपेण प्रकाशिता भवतु। प्रभूतवलयुक्ताः सुनियन्त्रिताः भवत्याः ये अश्वाः ते स्वर्णिमवर्णयुक्तां भवन्तीम् अत्र आनयन्तु।

व्याकरणविमर्शः-

- भाहि- भा-धातोः लोट्लकारे मध्यमपुरुषैकवचने भाहि इति रूपम्।
- ईरयन्ती- ईर्-धातोः णिच्प्रत्यये शतृप्रत्यये ङीप्प्रत्यये च प्रथमैकवचने ईरयन्ती इति रूपम्।
- वहन्तु- वह्-धातोः लोट्लकारे प्रथमपुरुषैकवचने वहन्तु इति रूपम्।
- सुयमासः- सुयमशब्दस्य प्रथमाबहुवचने वैदिकं रूपमिदम्। लौकिके तु सुयमाः इति रूपम्।

उषः प्रतीची भुवनानि विश्वो-
र्ध्वा तिष्ठस्यमृतस्य केतुः।
समानमर्थं चरणीयमाना
चक्रमिव नव्यस्या ववृत्स्व॥३॥

पदपाठः- उषः। प्रतीची। भुवनानि। विश्वा। ऊर्ध्वा। तिष्ठसि। अमृतस्य। केतुः॥ समानम्। अर्थम्। चरणीयमाना। चक्रम्ऽइव। नव्यसि। आ। ववृत्स्व॥

अन्वयः- उषः विश्वा भुवनानि प्रतीची अमृतस्य केतुः ऊर्ध्वा तिष्ठसि, नव्यसि समानं चरणीयमाना चक्रमिव आ ववृत्स्व।

व्याख्या- हे उषः देवि सर्वाणि भुवनानि प्रतीची। प्रति आभिमुख्येनाञ्चति प्राप्नोतीति प्रतीची। अमृतस्य मरणधर्मरहितस्य सूर्यस्य केतुः प्रज्ञापयित्री त्वम् ऊर्ध्वा नमस्युन्नता तिष्ठसि। नव्यसि पुनः पुनर्जायमानतया नवतरे हे उषो देवि, अर्थम् अर्यते गम्यतेऽस्मिन्नित्यर्थो मार्गः। समानम् एकमार्गमुदयात् प्राचीनकाललक्षणं चरणीयमाना चरितुमिच्छन्ती त्वम् आ ववृत्स्व पुनस्तस्मिन् मार्गे आवृत्ता भव। तत्र दृष्टान्तः। चक्रमिव। यथा नभसि चरितुः सूर्यस्य रथाङ्गं पुनः पुनरावर्तते तद्वत्॥

सरलार्थः- हे देवि उषे! समस्तस्य लोकस्य पुरस्तात् आगच्छन्ती मरणधर्मरहितस्य सूर्यस्य आगमनवार्तां ज्ञापयन्ती भवती आकाशमध्ये तिष्ठति। हे सर्वदा नवीना तिष्ठन्ति, एकस्मिन् एव मार्गे विचरणं कुर्वन्ती भवती चक्रवत् वारं वारम् आगच्छतु।

व्याकरणविमर्शः-

- प्रतीची- प्रतिपूर्वकात् अञ्च्-धातोः क्विन्प्रत्यये प्रतीची इति रूपम्। प्रति आभिमुख्येन अञ्चति प्राप्नोति इति सायणाचार्यः।
- तिष्ठसि- स्था-धातोः लट्लकारे मध्यमपुरुषैकवचने तिष्ठसि इति रूपम्।
- नव्यसि- नव्-धातोः लट्-लकारे मध्यमपुरुषैकवचने नव्यसि इति रूपम्।
- चरणीयमाना- चरणीयशब्दस्य शानच्प्रत्यये टाप्प्रत्यये च प्रथमैकवचने चरणीयमाना इति रूपम्।
- ववृत्स्व- वृत्-धातोः यङ्लुङन्ते लोट्लकारे मध्यमपुरुषैकवचने ववृत्स्व इति रूपम्।

अव स्यूमेव चिन्वती मघो-
न्युषा याति स्वसरस्य पत्नी।
स्वर्जनन्ती सुभगा सुदंसा
आन्ताद्दिवः पप्रथ आ पृथिव्याः॥४॥

टिप्पणी

पदपाठः- अव। स्यूमऽइव। चिन्वती। मघोनी। उषा। याति। स्वसरस्य। पत्नी॥ स्वः। जनन्ती। सुऽभगा। सुऽदंसाः। आ। अन्तात्। दिवः। पप्रथे। आ। पृथिव्याः॥

अन्वयः- स्वसरस्य पत्नी मघोनी उषा स्यूम इव अव चिन्वती याति, स्वः जनन्ती सुभगा सुदंसा दिवः आ अन्तात् पृथिव्याः पप्रथे।

व्याख्या- येयम् उषा स्यूमेव वस्त्रमिव विस्तृतं तमः अवचिन्वती अवचयमपक्षयं प्रापयन्ती मघोनी धनवती स्वसरस्य सुष्ठुवस्यति क्षिपति तम इति स्वसरा सूर्यो वासरो वा। तस्य पत्नी सती याति गच्छति। स्वः स्वकीयं तेजः जनन्ती जनयन्ती सुभगा सुधना सौभाग्ययुक्ता वा सुदंसा शोभनाग्निहोत्रकर्मा सेयमुषा दिवः द्युलोकस्य आ अन्तात् पृथिव्याः च आ अन्तात् अवसानात् पप्रथे प्रथते प्रकाशते इत्यर्थः।

सरलार्थः- सूर्यस्य भार्या, धनयुक्ता उषा देवी वस्त्रमिव विस्तृतम् अन्धकारं नाशयन्ती गमनं करोति। स्वतेजः उत्पादयन्ती सुन्दरी धनयुक्ता सुन्दराग्निहोत्रादियज्ञानुष्ठानं कारयन्ती उषादेवी द्युलोकस्य पृथिवीलोकस्य च अन्तं यावत् स्वप्रकाशेन अन्धकारं नाशयति।

व्याकरणविमर्शः-

- चिन्वती- चि-धातोः शतृप्रत्यये ङीप्प्रत्यये च प्रथमैकवचने चिन्वती इति रूपम्।
- जनन्ती- जन्-धातोः णिच्प्रत्यये शतृप्रत्यये ङीप्प्रत्यये च प्रथमैकवचने वैदिकं रूपमिदम्। लौकिके जनयन्ती इति रूपं भवति।
- पप्रथे- प्रथ्-धातोः लिट्लकारे आत्मनेपदे प्रथमपुरुषैकवचने पप्रथे इति रूपम्।

अच्छा वो देवीमुषसं विभातीं
प्र वो भरध्वं नमसा सुवृक्तिम्।
ऊर्ध्वं मधुधा दिवि पाजो अश्रे-
त्प्र रोचना रुरुचे रण्वसंदृक्॥५॥

पदपाठः- अच्छ। वः। देवीम्। उषसम्। विऽभातीम्। प्र। वः। भरध्वम्। नमसा। सुऽवृक्तिम्॥ ऊर्ध्वम्। मधुधा। दिवि। पाजः। अश्रेत्। प्र। रोचना। रुरुचे। रण्वसंदृक्॥

अन्वयः- वः अच्छ विभातीम् उषसं देवीं वः नमसा सुवृक्तिं प्रभरध्वम्। मधुधा दिवि ऊर्ध्वं पाजः अश्रेत्। रण्वसंदृक् रोचना प्ररुरुचे।

व्याख्या- हे स्तोतारः वः युष्मान् अच्छ अभिलक्ष्य विभातीं शोभमानाम् उषसं देवीं प्रति वः युष्माकं सम्बन्धिना नमसा नमस्कारेण सह सुवृक्तिं शोभनां स्तुतिं प्रभरध्वं यूयं कुरुत। मधुधा मधुराणि स्तुतिलक्षणानि वाक्यानि दधतीति। मधुः सोमः। तं धारयतीति वा। यद्वा। मधुधादित्यधात्री। यद्वा। अवग्रहाभावादव्युत्पन्नावयवम् अखण्डमिदं पदम्, उषो नाम सेयमुषा दिवि नभसि ऊर्ध्वं पाजः

ऊर्ध्वाभिमुखं पाजस्तेजः अश्रेत् श्रयति तथा रोचना रोचनशीला रण्वसंदृक् रमणीयदर्शनोषाः प्र रुरुचे प्रकर्षेण यद्वा रोचना लोकान् प्ररुरुचे प्रकर्षेण स्वतेजसा दीपयति।

सरलार्थः- (हे स्तोतासमूह) यूष्मान् लक्ष्यीकृत्य प्रकाश्यमानाम् उषादेवीं प्रति यूयं यूष्माकं नमनयुक्तां सुन्दरस्तुतिं समर्पयन्तु। मधु धारयन्ती उषा देवी द्युलोके ऊर्ध्वं प्रति स्वप्रकाशं प्रसारयति। रमणदर्शनयुक्ता उषा देवी जनान् अत्यधिकं प्रकाशयति।

व्याकरणविमर्शः-

- विभातीम्- विपूर्वकात् भा-धातोः शतृप्रत्यये ङीप्प्रत्यये च द्वितीयैकवचने विभातीम् इति रूपम्।
- भरध्वम्- भृ-धातोः लोट्लकारे आत्मनेपदे मध्यमपुरुषबहुवचने भरध्वम् इति रूपम्।
- रोचना- रुच्-धातोः ल्युट्प्रत्यये टाप्प्रत्यये च रोचना इति रूपम्।
- अश्रेत्- श्रि-धातोः लङ्लकारे प्रथमपुरुषैकवचने वैदिकं रूपमिदम्।
- रुरुचे- रुच्-धातोः लिट्लकारे प्रथमपुरुषैकवचने रुरुचे इति रूपम्।

ऋतावरी दिवो अर्कैरबो-
ध्या रेवती रोदसी चित्रमस्थात्।
आयतीमग्न उषसं विभातीं
वाममेषि द्रविणं भिक्षमाणः॥६॥

पदपाठः- ऋतऽवरी। दिवः। अर्कैः। अबोधि। आ। रेवती। रोदसी इति। चित्रम्। अस्थात्॥
आऽयतीम्। अग्ने। उषसम्। विऽभातीम्। वामम्। एषि। द्रविणम्। भिक्षमाणः॥

अन्वयः- ऋतावरी दिवः अर्कैः अबोधि। रेवती रोदसी। चित्रम् अस्थात्। अग्ने! आयतीं विभातीम् उषसं भिक्षमाणः वामं द्रविणम् एषि।

व्याख्या- ऋतावरी सत्यवती येयमुषा दिवः द्युलोकात् अर्कैः तेजोभिः अबोधि सर्वैर्ज्ञायते। ततः रेवती धनवती येयं रोदसी द्यावापृथिव्यौ चित्रं नानाविधरूपयुक्तं यथा भवति तथा अस्थात् सर्वतो व्याप्य तिष्ठति। हे अग्ने आयतीं त्वदभिमुखमागच्छन्तीं विभातीं भासमानाम् उषसम् उषेदेवीं भिक्षमाणः हवींषि याचमानस्त्वं वामं वरणीयं द्रविणम् अग्निहोत्रादिलक्षणं धनम् एषि प्राप्नोषि।

सरलार्थः- सत्यवती उषा द्युलोकात् प्रसारितेन तेजसा ज्ञायते। धनवती उषादेवी द्युलोकं पृथिवीलोकं च विवधैः प्रकारैः व्याप्य तिष्ठति। हे अग्निदेव भवतः सम्मुखं प्रति आगच्छन्त्याः उषादेव्याः याचमानः वरणयोग्यं धनं प्राप्नोति।

व्याकरणविमर्शः-

- अस्थात्- स्था-धातोः लङ्लकारे प्रथमपुरुषैकवचने अस्थात् इति रूपम्।

टिप्पणी

- अबोधि- बुध्-धातोः लङ्लकारे प्रथमपुरुषैकवचने अबोधि इति रूपम्।
- आयतीम्- आङ्पूर्वकात् इण्-धातोः शतृप्रत्यये ङीप्प्रत्यये च द्वितीयैकवचने आयतीम् इति रूपम्।
- विभातीम्- विपूर्वकात् भा-धातोः शतृप्रत्यये ङीप्प्रत्यये च द्वितीयैकवचने विभातीम् इति रूपम्।
- भिक्षमाणः- भिक्ष्-धातोः शानच्प्रत्यये प्रथमैकवचने भिक्षमाणः इति रूपम्।
- एषि - इ-धातोः लट्लकारे मध्यमपुरुषैकवचने एषि इति रूपम्।

ऋ॒तस्य॑ बु॒ध्न उ॒षसा॑मिष॒ण्यन्-
वृषा॑ म॒ही रोद॑सी॒ आ वि॑वेश।
म॒ही मि॒त्रस्य॒ वरु॑णस्य मा॒या
च॒न्द्रेव॑ भा॒नुं वि द॑धे पु॒रु॒त्रा॥७॥

पदपाठः- **ऋ॒तस्य॑। बु॒ध्ने। उ॒षसा॑म्। इ॒ष॒ण्यन्। वृषा॑। म॒ही इति॑। रोद॑सी॒ इति॑। आ। वि॒वे॒श॥**

म॒ही। मि॒त्रस्य॑। वरु॑णस्य। मा॒या। च॒न्द्राऽइ॑व। भा॒नु॒म्। विऽद॒धे। पु॒रु॒त्रा॥

अन्वयः- वृषा ऋतस्य बुध्ने उषसाम् इषण्यन् मही रोदसी आ विवेश। मित्रस्य वरुणस्य मही माया चन्द्रा इव भानुं पुरुत्रा विदधे।

व्याख्या- वृषा वृष्टिद्वारा अपां प्रेरक आदित्यः ऋतस्य अग्निहोत्रादिककर्मकरणे सत्यभूतस्याह्नः बुध्ने मूले उषसामिषण्यन् प्रेरणं कुर्वन् मही महत्यौ रोदसी द्यावापृथिव्यौ आ विवेश स्वतेजोभिः सर्वतः प्रविष्टवान्। यद्वा वृषा वर्षितेषण्यन् सर्वतो गच्छन्नुषसां सम्बन्धी रश्मिसमूहो रोदसी द्यावापृथिव्यौ विष्टवानिति योजनीयम्। ततः मही महती मित्रस्य वरुणस्य मित्रावरुणयोः माया प्रभारूपा सती चन्द्रेव सुवर्णानीव भानुं स्वप्रभां पुरुत्रा बहुषु देशेषु विदधे विदधाति सर्वत्र प्रसारयति।

सरलार्थः- वृष्टिद्वारा जलस्य प्रेरकः सूर्यः प्राकृतिकनियमानुसारं दिनस्यादौ उषां प्रेरयित्वा द्युलोके पृथिवीलोके च व्याप्तः जातः। मित्राणां वरुणदेवतानां च महती प्रभास्वरूपिणी उषा स्वर्णिमकान्तिः इव सूर्यं बहुषु स्थानेषु प्रसारितं करोति।

व्याकरणविमर्शः-

- इषण्यन्- इष्-धातोः णिच्प्रत्यये शतृप्रत्यये च प्रथमैकवचने इषण्यन् इति रूपम्।
- विवेश- विश्-धातोः लिट्लकारे प्रथमपुरुषैकवचने विवेश इति रूपम्।
- विदधे- विपूर्वकात् धा-धातोः लिट्लकारे प्रथमपुरुषैकवचने विदधे इति रूपम्।

पाठगतप्रश्नाः-३

३१. उषस्सूक्तस्य कः ऋषिः। किम् छन्दः। का च देवता।

३२. ईरयन्ती इति पदस्य निष्पत्तिः कुतः।

३३. इषण्यन् इति पदस्य निष्पत्तिः कुतः।

३४. सूक्तमिदम् कस्मिन् वेदे अन्तर्भवति॥

३५. विभातीम् इति पदस्य निष्पत्तिः कुतः।

३६. अस्मिन् सूक्ते कस्य प्रार्थना विधीयते।

३७. पप्रथे इति पदस्य निष्पत्तिः कुतः।

३८. अस्थात् इति पदस्य निष्पत्तिः कुतः।

३९. आदिमे मन्त्रे का प्रार्थना विधीयते।

४०. अश्रेत् इति पदस्य निष्पत्तिः कुतः।

१.५) उषस्स्वरूपम्

सम्पूर्णे ऋग्वेदे प्रायः विंशत्यां सूक्ते उषस्-देव्याः स्तुतिः विहिता। प्रकाशर्थकात् वस्-धातोः उषस्-शब्दो निष्पद्यते। तस्मात् उषस्-शब्दस्य अर्थो भवति प्रकाशमाना देवी इति। उषा देवी जरामरणरहिता इति ऋषिभिः वर्णिता। तस्याः स्वरूपम् अविनाशि वर्तते, परन्तु बहुत्र स्थलेषु द्युलोकस्य दुहितृत्वेन अस्याः वर्णना प्राप्यते। उषा देवी हि सुजाता अर्थात् तस्याः जन्म उच्चवंशे अभवत्। सम्पूर्णवैदिकसाहित्ये उषस्-देव्याः यत् मनोहरं स्वरूपं वर्णितं, तादृशं स्वरूपं तु न अन्यस्याः कस्याश्चित् देव्याः वर्तते। प्रातःकालस्य अधिष्ठात्रीदेवीरूपेण उषा चित्रिता। सूर्योदयात् किञ्चित् प्राक् यः समयः वर्तते, स एव उषस्-देव्याः आगमनसमय इत्युच्यते। अग्नेः अपि उषस्-देव्याः प्रेमित्वेन वर्णना प्राप्यते। अन्नद्वारा अन्नवती तथा धनवती हि उषा देवी। सर्वैरेव ज्ञायमाना इयं पुरातनी युवतिः इव भाति, विविधोपायेन स्तूयमाना एषा यज्ञम् उद्दिश्य विचरति। सुवर्णमये रथे आरूढा इयं सदा प्रियं तथा सत्यम् एव भाषते। प्रभूतबलयुक्ताः सुष्ठुतया नियन्त्रिताः स्वर्णिमरङ्गविशिष्टाः तस्याः अश्वाः तां यज्ञस्थलं प्रापयन्ति।

निखिलमनुष्याणां सम्मुखं गन्त्री मरणधर्मरहिता सूर्यागमनविषयकज्ञानदायिका इयं देवी आकाशे तिष्ठति। प्रत्यहम् एकवारम् एव उदयकारणात् इयं सदैव नवीना एव तिष्ठति। समाने एव मार्गे विचरन्ती इयं चक्रवत् पौनःपुन्येन आगच्छति। सूर्यस्य पत्नी प्रचुरधनयुक्ता उषा देवी अन्धकारं नाशयन्ती विचरति। स्वस्याः तेजसम् उत्पादयन्ती सुन्दरधनविशिष्टा इयम् अग्निहोत्रम् आचरति। उषा देवी प्रत्यहं द्युलोकस्य अन्तः यावत् प्रकाशिता भवति। यज्ञे सोमस्य धारिका इयं उषा देवी द्युलोकस्य उपरि स्वस्याः तेजसः

प्रसारं करोति। रमणीयदर्शनयुक्ता इयम् उषा देवी सम्पूर्णस्य जगतः प्रकाशं करोति। सत्यवती इयं देवी स्वस्याः तेजःप्रभावात् अस्मिन् जगति ख्याता। धनयुक्ता इयं विविधप्रकारेण द्युलोकं पृथिवीलोकं च व्याप्य स्थिता। उषा देवी अस्मिन् जगति वृष्टिमाध्यमेन जलं प्रापयति। मित्रस्य वरुणस्य च प्रभास्वरूपा अथवा शक्तिस्वरूपा उषा देवी सूर्यम् अनेकस्थाने प्रसारितं करोति।

१.६) उषस्सूक्तस्य सारः

ऋग्वेदीयसमाजः पुरुषप्रधानः आसीत्। तत्र मन्त्राणाम् अधिष्ठातृरूपेण पुरुषदेवतायाः समधिकं प्राधान्यं परिलक्ष्यते। केषुचित् सूक्तेषु स्त्रीदेवतानाम् अपि स्तुतयः लभ्यन्ते परन्तु तासां स्तुतीनां संख्याः पुरुषापेक्षया न्यूनाः। कर्मवैचित्र्यानुसारं हि स्त्रीदेवताः पुरुषसमकक्षतां न भजन्ते। ताः अन्येषां देवानां कन्या, जाया, जननी वा भवन्ति। यद्यपि तासां स्वकीया महिमा विद्यते तथापि पुरुषदेवतानां समीपे तासां महिमा म्लायते यथा चन्द्रस्य पुरस्तात् अन्येषां नक्षत्राणाम्। समासेन वक्तुं शक्यते वैदिकपुरुषतान्त्रिकसमाजस्य नारीपुरुषसम्बन्धस्य चित्रं देवसमाजोपरि सम्यक् प्रतिफलितम्।

ऋग्वेदे यत्र देवीनां स्तुतयः विद्यन्ते तत्र एकः विषयः दृष्टिम् आकर्षयति तद्धि, ऋषीणां कवित्वभावना, सौन्दर्यचेतना च। प्राकृतिकरूपमाधुर्यम् एव सौन्दर्यभावनायाः प्रधानः उत्सः। न प्रकृतेः रुद्ररूपेषु परन्तु कोमल-मधुर-रसमयेषु रूपेषु एव नारीणां चिरन्तनं रूपं परिलक्षितम् ऋषिभिः। तदर्थम् एव प्रवाहिता स्रोतस्विनी, शस्यश्यामला पृथिवी, आलोकमयी उषा, अन्धकाररूपिणी रात्री, पवित्रतास्वरूपिणी सरस्वती च एताः सर्वाः ऋषिकल्पनायां देवीरूपेण ख्याताः। तासां रूपवर्णनायाम् ऋषीणाम् अलौकिककविभावनायाः सौन्दर्यभावनायाः सहृदयभावनायाः च परिचयः प्राप्यते।

एतादृशी एका देवी उषा। ऋग्वेदीयदेवीषु सा अन्यतमा। ऋग्वेदस्य पञ्चममण्डलस्य अशीतितमं सूक्तम् उषस्सूक्तम्। अत्र सत्यश्रवा ऋषिः, उषा देवता, त्रिष्टुप् छन्दः। अन्यासां देवीनाम् अपेक्षया तस्याः एव स्तुतिः अधिकसंख्यकसूक्तैः कृता। स्वर्गदुहिता उषा द्युलोकस्य अधिष्ठात्री देवी। प्रभाते सूर्योदयस्य पूर्वमुहूर्ते पूर्वगगने या मनोरमा अरुणवर्णीया आलोकच्छटा दिशः रञ्जयति सा हि अस्माकम् उषादेवी। उषोदये रात्रेः अन्धकारः शनैः अपसरति, पक्षीणां कूजनं रात्रेः निस्तब्धतां दूरीकरोति। उषायाः एनं महिमानं लक्षीकृत्य कविः अस्याः वन्दनां करोति। सा हि दिवो दुहिता (५.८०.५-६)। इति।

ऋग्वेदे स्तूयमाना उषा ऋषिकल्पनायां रूपलावण्यवती काचित् तरुणी। सा दीप्तिमती(भास्वती), शुक्लवसना युवती(युवतिः शुक्रवासाः)। तस्याः वक्षस्थलम् अनावृतं, दर्शनाय सा सर्वदा स्वकीयं शरीरं प्रकाशयति(१.१२३.११)। सूर्यदेवः तस्याः प्रणयी। मर्त्यलोकेषु कश्चिद् युवा यथा कामपि कन्यकाम् अनुसरति तथैव सूर्यः अपि उषादेव्याः पश्चाद् गच्छति। तथाहि आम्नातम् -

सूर्यो देवीमुषसं रोचमानां मर्यो न योषामभ्येति पश्चात्॥ (१.१२५.२)। इति।

उषा पुनः अश्विनीकुमारद्वयस्य सखी। उषायाः पश्चात् सूर्यस्य आविर्भावं परिलक्ष्य केचन कथयन्ति यत् सा सूर्यदेवस्य जननी। उषायाः देवीसत्ता सुस्पष्टा ऋग्वेदमन्त्रेषु। सा ऋतावरी, सत्यवती, सुनृतानां नेत्री च। सा रोगस्य नाशकारिणी, जगतां सुखकारिणी, विचित्रगतिमती। सा यजमानेभ्यः धनं

प्रददाति। प्रदीप्ते रथे आरूढा सा विश्वं व्याप्नोति। तस्या आगमनेन जीवजगति प्राणानां स्फुरणं भवति। नर्तकी यथा रात्रेः अन्धकारं दूरीकुर्वन् आविर्भवति तथैव आलोकमयी उषा रात्र्यन्धकारं नाशयति दिशश्च प्रकाशयति। तथाहि आम्नातम्- अधि पेशांसि वपते नृतुरिव। (१.९२.४)।

सा निद्रायाः जीवजगत् जागरयति। सा प्राणदायिनी मुक्तिदायिनी। सूर्यस्य आगमनवार्ता तया एव उद्घोष्यते। सा एव पृथिव्याः पूर्तिं विदधाति। उषायाः गतिं परिलक्ष्य एव कालस्य गतिः, सा चिरतरुणी अनवद्या च। अतः तस्याः स्तुतिपरायणाः सर्वे देवाः इति शम्।

पाठसारः-२

अस्मिन् पाठे सूक्तद्वयम् उपन्यस्तम्। तत्र पूषन्सूक्तम् पूर्वार्धे वर्तते। तस्य सारः तत्रैव प्रदत्तः। अधुना अत्र उषस्सूक्तांशस्य सारांशः समासेन प्रदीयते।

सूक्तमिदम् ऋग्वेदस्य तृतीयस्य मण्डलस्य एकषष्टितमम्। अस्य सूक्तस्य वामदेवऋषिः उषादेवता त्रिष्टुप् -छन्दश्च। अत्र भगवतीम् उषादेवीं लक्षीकृत्य प्रार्थना विधीयते। तत्र आदिमे मन्त्रे प्रार्थना विधीयते यत् सर्वैः इष्यमाणा स्तूयमाना च देवी उषा आयोज्यमानं यज्ञं लक्षीकृत्य विचरतु इति। द्वितीये मन्त्रे प्रार्थ्यते यत् नानागुणयुक्ता उषा देवी प्रकाशिता भूत्वा तस्य अश्वानां रथम् आरुह्य यज्ञस्थलम् आगच्छतु इति। तृतीये मन्त्रे प्रार्थ्यते आकाशमध्यस्थिता भगवती उषा वारं वारं चक्रवत् आगच्छतु इति। चतुर्थे मन्त्रे कथम् उषादेवी स्वप्रकाशेन द्युलोकस्य पृथ्वीलोकस्य च अन्धकारं नाशयति इति वर्णितम् अस्ति। पञ्चमे मन्त्रे जनैः स्तूयमाना मधुधारयन्ती उषादेवी कथं जनान् कथम् अत्यधिकं प्रसारयति इति वर्णितम् अस्ति। षष्ठे मन्त्रे उषादेवी कथं ज्ञायते कथं द्युलोकं पृथ्वीलोकं च व्याप्य तिष्ठति इत्यादिकं वर्णितमस्ति। सप्तमे मन्त्रे कथं सूर्यदेवः द्युलोके पृथ्वीलोके च व्याप्तः भवति कथं च उषादेवी सूर्यं सर्वत्र प्रसारयति इत्यादिकं वर्णितमस्ति।

पाठान्तप्रश्नाः

पूषन्सूक्ते

१. पूषन्सूक्तस्य सारं लिखत।

२. वणिजः किं किं करणाय पूषदेवतां प्रति उच्यते इति समन्त्रं व्याख्यात।

३. वयमु त्वा पथस्पते... इत्यादिमन्त्रस्य व्याख्यानं कुरुत।

४. परि तृन्धि पणीनामारया... इत्यादिमन्त्रस्य व्याख्यानं कुरुत।

५. या ते अष्टा गोओपशाघृणे... इत्यादिमन्त्रस्य व्याख्यानं कुरुत।

उषस्सूक्ते

६. उषस्सूक्तस्य सारं लिखत।

७. उषो वाजेन... इति मन्त्रं व्याख्यात।

८. उषो देव्यमर्त्या... इति मन्त्रं व्याख्यात।

९. अव स्तूमेव... इति मन्त्रं व्याख्यात।

१०. उषः प्रतीची... इति मन्त्रं व्याख्यात।

११. अच्छा वो... इति मन्त्रं व्याख्यात।

१२. ऋतावरी... इति मन्त्रं व्याख्यात।

१३. ऋतस्य बुध्न... इति मन्त्रं व्याख्यात।

१४. मही मित्रस्य... इति मन्त्रं व्याख्यात।

पाठगतप्रश्नानाम् उत्तराणि

१-पूषन्सूक्ते

१. भरद्वाजः ऋषिः, गायत्री छन्दः, पूषन् देवता।

२. पूरकः।

३. पथः मार्गस्य पते सम्बोधने एकवचने।

४. सन्-धातोः क्तिनि साति चतुर्थ्येकवचने।

५. युजिर् इतिधातोः लुङि उत्तपुरुषबहुवचने।

६. पुष्-धातोः कनिन्प्रत्यये सम्बोधने एकवचने।

७. नृभ्यो हितम्।

८. प्रयतं दक्षिणं यस्य तादृशम्।

९. नृशब्दात् यत्प्रत्यये।

१०. आगतदीप्ते।

११. शुद्धम्।

१२. तृद्-धातोः लोटि मध्यपुरुषैकवचने।

१३. चि-धातोः लोटि मध्यमपुरुषैकवचने।

१४. बाधकान् तस्करादींश्च।

१५. हृदयानि।

२-पूषन्सूक्ते

१६. प्रतोदः।

१७. वणिक्।

१८. विविध्य।

१९. कीर्णानि प्रशिथिलानि वा।

२०. किकिराणि।

२१. कृ-धातोः अचि द्वितीयाबहुवचने नपुंसके।

२२. कुरु।

२३. ब्रह्मोपपदात् चुद्-धातोः ल्युटि ङीपि।

२४. अश्-धातोः ष्ट्रनि टापि।

२५. गवाम् ओपशा इति तत्पुरुषः।

२६. सुपूर्वकात् म्ना-धातोः कप्रत्यये द्वितीयैकवचने।

२७. आत्मनेपदिनः ईङ्-धातोः उत्तमपुरुषबहुवचने।

२८. सुखम्।

२९. खादनाय।

३०. कुरु।

३-उषस्सूक्ते

३१. वामदेवः ऋषिः त्रिष्टुप् छन्दः उषा च देवता।

३२. ईर्-धातोः णिच्प्रत्यये शतृप्रत्यये ङीप्प्रत्यये च प्रथमैकवचने ईरयन्ती इति रूपम्।

३३. इष्-धातोः णिच्प्रत्यये शतृप्रत्यये च प्रथमैकवचने इषण्यन् इति रूपम्।

३४. ऋग्वेदे।

३५. अत्र भगवतीम् उषादेवीं लक्षीकृत्य प्रार्थना विधीयते।

३६. विपूर्वकात् भा-धातोः शतृप्रत्यये ङीप्प्रत्यये च द्वितीयैकवचने विभातीम् इति रूपम्।

३७. प्रथ्-धातोः लिट्लकारे आत्मनेपदे प्रथमपुरुषैकवचने पप्रथे इति रूपम्।

३८. स्था-धातोः लङ्लकारे प्रथमपुरुषैकवचने अस्थात् इति रूपम्।

३९. आदिमे मन्त्रे प्रार्थना विधीयते यत् सर्वैः इष्यमाणा स्तूयमाना च देवी उषा आयोज्यमानं यज्ञं लक्षीकृत्य विचरतु इति।

४०. श्रि-धातोः लङ्लकारे प्रथमपुरुषैकवचने वैदिकं रूपमिदम्।

॥ इति नवमः पाठः ॥